अन्यदा, व्य, (अन्यस्मिन् काले अन्य + दा ।) कालान्तरे । अन्यसमये । यथा,—
"अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव" ॥
इति माघः ॥

अन्यपुष्टः, पुं, (अन्यया स्वमातृभिन्नया पुष्टः ।) कोकिलः । यथा,—
"अप्यन्यपुष्टाः प्रतिकूलशब्दाः
श्रोतुर्वितन्त्रीरिव ताड्यमानाः" ।
इति कुमारसम्भवे ॥

अन्यपूर्व्वा, स्त्री, (अन्यः पूर्व्वो यस्याः सा ।) पौनर्भवा कन्या । एकस्मै वागादिना दत्ता पुनरन्येन विवाहिता कन्या । सा सप्तधा यथा,—
"सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः" ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या तु पुनर्भूप्रसवा च या ॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" ।
इत्युद्वाहतत्त्वं ॥

अन्यभृत्, पुं, (अन्यान् कोकिलान् बिभर्त्ति पालयति अन्य + भृ + क्विप् ।) काकः । इति हेमचन्द्रः ॥ (कोकिलः ।)

अन्यभृतः, पुं, (अन्यया स्वमातृभिन्नया भृतः पालितः तृतीयातत्पुरुषः ।) कोकिलः । इति हलायुधः ॥
("कलमन्यभृतासु भाषितं
कलहंसीषु मदालसं गतं" । इति रघुः ।)

अन्यमनस्कः, त्रि, भिन्नचित्तः । अन्यमनाः । अन्यस्मिन् मनो यस्य स इति बहुव्रीहौ कप्रत्ययेन सिद्धः ॥ (विषयान्तरासक्तचित्ततया उपस्थितकार्य्येऽनवहितहृदयः । अस्थिरः । चञ्चलचित्तः ।)

अन्यवर्द्धितः, त्रि, (अन्यया योषिता वर्द्धितः पुष्टः ।) अन्यपुष्टः । परैधितः । अन्येन प्रतिपालितः । इति जटाधरः ॥

अन्यवादी, [न्] त्रि, (अन्यत् पूर्व्वस्वीकृतवाक्यात् भिन्नं वदति, अन्य + वद् + णिनि उपपदसमासः ।) इतरवादी । अस्थिरवादी । अन्यथावादी । यथा,—
"अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्यशाखकः, पुं, (अन्या स्वशाखेतरा शाखा यस्य सः, समासान्तः कः ।) स्ववेदशाखामुत्सृज्यापरशाखाश्रयकर्म्म कुर्व्वाणः । तत्पर्य्यायः । शाखारण्डः २ । इति हेमचन्द्रः ॥

अन्यादृक्, [श्] त्रि, (अन्यमिव पश्यति अन्य + , दृश् + क्विन्, उपपदसमासः । "दृक्‌दृशवतुषु" इति आकारः ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यादृशः, त्रि, (अन्यइव पश्यति अन्य + दृश् + कञ् आत्वञ्च ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यायः, पुं, (न्यायः । सङ्गतिः । युक्तिः । औचित्यं, तस्मादन्यः नञ्समासः ।) न्यायभिन्नः । अनौचित्यं । अयुक्तिः । यथा,—
"अन्यायेनापि यद्भुक्तं पित्रा पूर्व्वतरैस्त्रिभिः ।
न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतं" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्याय्यः, त्रि, (न्यायादनपेतः, न्याय + अनपेतार्थे यत्, ततो नञ्समासः ।) अनुचितः । अयोग्यः । यथा,—दृष्टार्थसत्त्वे अदृष्टकल्पनाया अन्याय्यत्वादित्यधिकरणमालायां माधवाचार्य्यः ॥ (असङ्गतः । गर्हितः । धर्म्मविरुद्धः । युक्तिविरोधी । "न्याय्यं सन्नेच्छते कर्त्तुमन्याय्यं वा करोति यः" । इति कात्यायनसंहिता ।)

अन्यूनः, त्रि, (न न्यूनः, नञ्समासः ।) न्यूनतारहितः । सम्पूर्णः । इति जटाधरः ॥

अन्येद्यु, [स्] व्य, (अन्यस्मिन् दिवसे निपातनात् सिद्धम् ।) अन्यस्मिन्नहनि । दिवसान्तरे । अन्यदिने । इत्यमरः ॥
("अन्येद्युरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः" ।
इति रघुवंशे ।)

अन्योदर्य्यः, पुं स्त्री, (अन्यस्याः स्वमातृभिन्नविमातुरुदरे जातः अन्योदर + यत् एकपितृकः भिन्नमातृको भ्राता ।) वैमात्रेयः । यथा,—
"अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्" ।
इति याज्ञवल्क्यः ॥ (अन्यमातृजः ।)

अन्योन्यं, त्रि, (अन्य + व्यतिहारार्थे द्वित्वं, ततः पूर्व्वपदात्परः सुश्च ।) उभयतः । तत्पर्य्यायः । इतरेतरं । २ परस्परं । ३ । इति हेमचन्द्रः ॥
("अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः"
इति उत्तरचरिते ।)

अन्योन्याश्रयः, त्रि, (अन्योन्यमाश्रयति, अन्योन्य + आ + श्रि + पचाद्यच् ।) परस्परज्ञानसापेक्षज्ञानाश्रयः । इति स्मार्त्ताः ॥ स्वग्रहसापेक्षग्रहसापेक्षग्रहकः । इति तार्किकाः ॥ तर्कविशेषः । तस्य लक्षणं । स्वापेक्षापेक्षितत्वनिबन्धनप्रसङ्गत्वं । अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ग्राह्या । तत्राद्या यथा । घटोऽयं यद्येतद्घटज्ञानजन्यज्ञानविषयः स्यात् तदैतद्घटभिन्नः स्यात् । द्वितीया यथा । घटोऽयं यद्येतद्घटजन्यजन्यः स्यात् तदैतद्घटजन्यभिन्नः स्यात् । तृतीया यथा । घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येत । इति जगदीशः ॥

अन्वक्, [च्] त्रि, (अनु पश्चात् अञ्चति गच्छति अनु + अञ्च + क्विन्) पश्चाद्गामी । इत्यमरः ॥ (अनुपदं । पश्चात् । "तां देवतापित्रतिथिक्रियार्थामन्वक् ययौ मध्यमलोकपालः" । इति रघुवंशे ।)

अन्वयः, पुं, (अनु + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥
("तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः" ।
इति रघुवंशे । वंशपरम्परा ।
"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्" ।
इति रघुवंशे ।
"काव्यदेव्यभिधा सूरवधूः शुद्धान्वया" ॥
इति राजतरङ्गिणी । वंशजाताः पुत्त्रपौत्त्रादयः ।
"मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः" ।
इति नारदः ।
"स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ।
इति मनुः ।) पदानां परस्पराकाङ्क्षा योग्यता च । इति दुर्गादासः ॥ परस्परसम्बन्धः । इति रामतर्कवागीशः ॥

अन्ववायः, पुं, (अनु + अव + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥ ("कथमेकान्ववायोऽयमस्माकं" । इति शाकुन्तले ।)

अन्वष्टका, स्त्री, (अष्टौ परिमाणान्यस्याः, अष्टन् + कन्, इत्वाभावः, अष्टकामनुगता प्रादिसमासः ।) अष्टकापश्चात्तिथिः । सा तु गौणचान्द्रपौषमाघफाल्गुनाश्विनमासानां कृष्णनवमी । तत्र सामोर्नां मातृकश्राद्धं । इति श्राद्धविवेकः ॥ तत्र साग्निकर्त्तव्यमातृपक्षश्राद्धं । यथा शङ्खः ।
"पित्रादित्रिकपत्नीषु भोज्या मातृः प्रतिदिशाः ।
स्त्रीणामेव तु तच्छ्राद्धं मातृश्राद्धमिहोच्यते" ॥
एतच्चान्वष्टकाश्राद्धं साग्निमात्रेण कर्त्तव्यं ।
तथा च विष्णुः । अन्वष्टकास्वष्टकावद्धौ कृत्वा मात्रे पितामह्यै प्रपितामह्यै पूर्व्ववद्ब्राह्मणान् भोजयित्वा इति । अत्र होमत्वादेवाग्निप्राप्तेरग्निग्रहणं तन्नियमार्थं । न चासौ करणहोमे विप्रपाण्यादेर्व्विधानादत्रापि तथेति वाच्यं । प्रकृतीभूतश्राद्धविध्युक्तसाधारणान्तरस्य विकृतीभूतश्राद्धे विशेषविहिताधारेण बाधात् । शरमयबर्हिषा कुशमयबर्हिर्बाधवत् । न वा लौकिकाग्नौ होमः ।
"न पैतृयज्ञियो होमो लौकिकाग्नौ विधीयते" ।
इति मनुवचनेन निषेधात् । श्राद्धचिन्तामणावप्येवं । इति श्राद्धतत्त्वं ॥

अन्वक्षः, त्रि, (अनु + अक्ष + पचाद्यच् । अक्षमिन्द्रियमनुगतम्, प्रादिसमासः, प्रत्यक्षे, अनुगते अनुपदे ।) पश्चाद्गामी । इत्यमरः ॥

अन्वाधिः, पुं, (अनु पश्चात् आधीयते न्यस्यते, अनु + आ + धा + कि ।) एकस्मिन् यदर्पितं वस्तु तेन पुरुषान्तरे अमुष्मिन् स्वामिनि त्वं दास्यसीति निर्द्दिष्टं तत् । इति विवादार्णवसेतुः ॥ कार्य्येषु वाचनेन अमुष्मिन् पुरुषे त्वं दद्या इति परिभाष्य यत् समर्पितं तत् । इति हलायुधः ॥ यथा,—
"अर्थमार्गणकार्य्येषु अन्यस्मिन् वचनान्मम ।
दद्यास्त्वमिति यो दत्तः स इहान्वाधिरुच्यते" ॥
इति कात्यायनः ॥ पुनर्बन्धकः । पश्चान्मानसी व्यथा । अनुपूर्व्वकस्य आधिशब्दस्य इत्यर्थद्वयमपि सम्भवति ॥

अन्वाधेयं, क्ली, (अनु विवाहानन्तरमाधेयं समर्पणीयं, अनु + आ + धा + कर्म्मणि यत् ।) विवाहानन्तरपितृमातृभर्तृकुललब्धस्त्रीधनं । यथा,—
"विवाहात् परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया ।
अन्वाधेयं तदुक्तन्तु लब्धं बन्धुकुलात्तथा" ॥
इति कात्यायनः,—

अन्वासनं, क्ली, (अनु + आस् + ल्युट्) खेदवृत्तिः । अनुशोचनं । उपासना । इति विश्वमेदिन्यौ । शिल्पादिस्थहं । इति हलायुधः ॥ (अनुवासनं ॥